# सीताष्टोत्तरशतनामावलिः

sItAShTottarashatanAmAvaliH

sanskritdocuments.org

May 6, 2018

# sItAShTottarashatanAmAvaliH

# सीताष्टोत्तरशतनामावलिः

## Sanskrit Document Information

Text title : sItAShTottarashatanAmAvaliH

File name : sItAShTottarashatanAmAvaliH.itx

Category : devii, aShTottarashatanAmAvalI, sItA

Location : doc_devii

Proofread by : PSA Easwaran psawaswaran at gmail.com

Latest update : March 10, 2018

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

May 6, 2018

*sanskritdocuments.org*

# सीताष्टोत्तरशतनामावलिः

सीतायै नमः । सीरध्वजसुतायै । सीमातीतगुणोज्ज्वलायै ।
सौन्दर्यसारसर्वस्वभूतायै । सौभाग्यदायिन्यै । देव्यै ।
देवार्चितपदायै । दिव्यायै । दशरथस्नुषायै । रामायै ।
रामप्रियायै । रम्यायै । राकेन्दुवदनोज्ज्वलायै । वीर्यशुल्कायै ।
वीरपत्न्यै । वियन्मध्यायै । वरप्रदायै । पतिव्रतायै ।
पङ्क्तिकण्ठनाशिन्यै । पावनस्मृत्यै नमः ॥ २०

वन्दारुवत्सलायै नमः । वीरमात्रे । वृतरघूत्तमायै ।
सम्पत्कर्यै । सदातुष्टायै । साक्षिण्यै । साधुसम्मतायै । नित्यायै ।
नियतसंस्थानायै । नित्यानन्दायै । नुतिप्रियायै । पृथ्व्यै ।
पृथ्वीसुतायै । पुत्रदायिन्यै । प्रकृत्यै । परायै । हनुमत्स्वामिन्यै ।
हृद्यायै । हृदयस्थायै । हताशुभायै नमः ॥ ४०

हंसयुक्तायै नमः । हंसगत्यै । हर्षयुक्तायै । हतासुरायै ।
साररूपायै । सारवचसे । साध्व्यै । सरमाप्रियायै । त्रिलोकवन्द्यायै ।
त्रिजटासेव्यायै । त्रिपथगार्चिन्यै । त्राणप्रदायै । त्रातकाकायै ।
तृणीकृतदशाननायै । अनसूयाङ्गरागाङ्कायै । अनसूयायै ।
सूरिवन्दितायै । अशोकवनिकास्थानायै । अशोकायै ।
शोकविनाशिन्यै नमः ॥ ६०

सूर्यवंशस्नुषायै नमः । सूर्यमण्डलान्तस्थवल्लभायै ।
श्रुतमात्राघहरणायै । श्रुतिसन्निहितेक्षणायै । पुण्यप्रियायै ।
पुष्पकस्थायै । पुण्यलभ्यायै । पुरातनायै । पुरुषार्थप्रदायै ।
पूज्यायै । पूतनाम्न्यै । परन्तपायै । पद्मप्रियायै । पद्महस्तायै ।
पद्मायै । पद्ममुख्यै । शुभायै । जनशोकहरायै ।
जन्ममृत्युशोकविनाशिन्यै । जगद्रूपायै नमः ॥ ८०

जगद्वन्द्यायै नमः । जयदायै । जनकात्मजायै । नाथनीयकटाक्षायै ।

नाथायै । नाथैकतत्परायै । नक्षत्रनाथवदनायै । नष्टदोषायै ।
नयावहायै । वह्निपापहरायै । वह्निशैत्यकृते । वृद्धिदायिन्यै ।
वाल्मीकिगीतविभवायै । वचोऽतीतायै । वराङ्गनायै । भक्तिगम्यायै ।
भव्यगुणायै । भान्त्यै । भरतवन्दितायै । सुवर्णाङ्ग्यै ॥ १००

सुखकर्यै नमः । सुग्रीवाङ्गदसेवितायै । वैदेह्यै ।
विनताघौघनाशिन्यै । विधिवन्दितायै । लोकमात्रे ।
लोचनान्तःस्थितकारुण्यसागरायै । श्रीरामवल्लभायै नमः ॥ १०८

सीतामुदारचरितां विधिशम्भुविष्णु-
वन्द्यां त्रिलोकजननीं नतकल्पवल्लीम् ।
हैमामनेकमणिरञ्जितकोटिभास-
भूषोत्करामनुदिनं ललितां नमामि ॥

उन्मृष्टं कुचसीम्नि पत्रमकरं दृष्ट्वा हठालिङ्गनात्
कोपो मास्तु पुनर्लिखाम्यमुमिति स्मेरे रघूणां वरे ।
कोपेनारुणितोऽश्रुपातदलितः प्रेम्णा च विस्तारितो
दत्ते मैथिलकन्यया दिशतु नः क्षेमः कटाक्षाङ्कुरः ॥

इति सीताष्टोत्तरशतनामावलिः समाप्ता ।

Proofread by PSA Easwaran psaeaswaran at gmail.com

*sItAShTottarashatanAmAvaliH*

pdf was typeset on May 6, 2018

Please send corrections to *sanskrit@cheerful.com*